Click here to go back

Ketu mantra - Hindi

## अथ केतु मंत्रः

ओं अस्य श्री केतु महामंत्रस्य मयच्छंद ऋषिः। गायत्री छंदः। केतुर्देवता। केतुग्रह प्रसाद सिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) धूम्रवर्णाय अंगुष्ठाभ्यां नमः। द्विबाहवे तर्जनीभ्यां नमः। केतवे मध्यमाभ्यां नमः। विकृताननाय अनामिकाभ्यां नमः। गृध्राननाय कनिष्ठिकाभ्यां नमः। अब्धकाय करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) धूम्रवर्णाय हृदयाय नमः। द्विबाहवे शिरसे स्वाहा। केतवे शिखायै वषट्। विकृताननाय कवचाय हुं। गृध्राननाय नेत्रत्रयाय वौषट्। अब्धकाय अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) धूम्रवर्णं द्विबाहुं च केतुं च विकृताननं। गृध्राननगतं नित्यं ध्यायेत्सर्व फलाप्तये॥ (लमित्यादि पंच पूजा) ओं लं पृथ्वितत्वात्मने गंधान्धारयामि। ओं हं आकाशतत्वात्मने पुष्पं समर्पयामि। ओं यं वायुतत्वात्मने धूपमाघ्रापयामि। ओं रं वह्नितत्वात्मने दीपन्दर्शयामि। ओं वं अमृततत्वात्मने अमृतनैवेद्यं समर्पयामि। सर्वतत्वात्मने सर्वोपचार पूजां समर्पयामि॥ केतुं कृण्वन्न केतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः। इति केतु मंत्रः॥

**Please consider the environment -**

**do not print unless essential**

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back